दारुसिता, स्त्री, (दारुणि सिता शर्करेव ।) त्वक् । दारुचिनि इति भाषा । तन्नामगुणाः ।
"त्वक्स्वाद्वी तु तनुत्वक् स्यात् तथा दारुसिता मता ।
उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् ॥ सुरभिः शुक्रला वर्ण्या मुखशोषतृषापहा ॥"
इति भावप्रकाशः ॥

दारुस्त्री, स्त्री, (दारुमयी स्त्री ।) दारुका । इति त्रिकाण्डशेषः ॥

दारुहरिद्रा, स्त्री, (दारुप्रधाना हरिद्रा ।) स्वनामख्यातवृक्षविशेषः । तत्पर्य्यायः । पीतद्रुः २ कालेयकः ३ हरिद्रुः ४ दार्व्वी ५ पचम्पचा ६ पर्ज्जनी ७ । इत्यमरः ।२।४।१०२ ॥ पीतिका ८ पीतदारु ९ स्थिररागा १० कामिनी ११ कटङ्कटेरी १२ पर्ज्जन्या १३ पीता १४ दारुनिशा १५ कालीयकम् १६ कामवती १७ दारुपीता १८ कर्कटिनी १९ दारु २० निशा २१ हरिद्रा २२ । इति शब्दरत्नावली ॥ अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । व्रणमेहकण्डुविसर्पत्वग्दोषविषकर्णाक्षिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफपित्तशोषनाशित्वम् । विशेषेण कर्णाभिष्यन्दनाशित्वञ्च । इति राजवल्लभः ॥

दारुहस्तकः, पुं, (हस्त इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५।३।९६। इति कन् । दारुणो हस्तकः ।) काष्ठनिर्म्मितहस्तः । काठेर हाता इति भाषा । तत्पर्य्यायः । दर्व्विः २ । इत्यमरः । ६ । २ । ३४ ॥

दार्घसत्रः, त्रि, (दीर्घसत्रे भवः । दीर्घसत्र+अण् । "देविकाशिंशपेति ।" ७।३।१। इति आदाच आत् ।) दीर्घसत्रयागे भवः । इति सिद्धान्तकौमुदी ॥

दार्ढ्यं, क्ली, (दृढस्य भावः । दृढ+"वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३। इति ष्यञ् ।) दृढता । (यथा, पञ्चदश्याम् । ६ । १०४ ।
"वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरन्ति हि ॥")

दार्द्दुरं, क्ली, दक्षिणावर्त्तशङ्खः । जतु । जलम् । इति शब्दार्थकल्पतरुः ॥ दर्द्दुरधर्म्मश्च ॥

दार्वटं, क्ली, मन्त्रावेश्म । इति हारावली ।१६८॥

दार्व्वण्डः, पुं, (दारुवत् कठिनमण्डं यस्य ।) मयूरः । इति शब्दकल्पतरुः ॥

दार्व्वाघाटः, पुं, (दारु काष्ठं आहन्तीति । आ+हन्+"दारावाहनोऽणन्त्यस्य च टः संज्ञायाम् ।" ३।२।४९। इत्यस्य वार्त्तिकोक्त्या अण टश्चान्तादेशः ।) शतपत्रकपक्षी । इत्यमरः । २ । ५ । १७ ॥ काठठोकरा इति भाषा । (यथा, महाभारते । १० । ७ । १८ ।
"दार्व्वाघाटस्तथावापि चासवक्त्राश्च भारत ।")

दार्व्वाघातः, पुं, (दारुणि आघातो यस्मात् ।) दार्व्वाघाटपक्षी । इति शब्दरत्नावली ॥

दार्व्विका, स्त्री, (दारयतीति । दृ+उत्वादित्वात् साधुः । दार्व्वी दारुहरिद्राविकारः । ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) काथोद्भवतुत्थम् । गोजिह्वा । इत्यमरः । २ । ४ । ११९ ॥

दार्व्विपत्त्रिका, स्त्री, (दार्व्व्याः पत्त्रमिव पत्त्रमस्याः । दार्व्विपत्त्रा ततः स्वार्थे कन् टापि अत इत्वञ्च ।) गोजिह्वा । इति रत्नमाला ॥

दार्व्वी, स्त्री, (दारयति । दृ+"उत्वादयश्च ।" उणां ४ । ९७ । इति निपातनात् साधुः ।) दारुहरिद्रा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"कटङ्कटेरी दार्व्वी स्यात्तथा दारुनिशेति च । ख्याता दारुहरिद्रा च पर्ज्जनी च पचम्पचा ॥"
अस्या गुणा यथा,—
"दार्व्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) गोजिह्वा । इति मेदिनी । वे, ११ ॥ देवदारु । हरिद्रा । इति विश्वः ॥

दार्व्वीकाथोद्भवं, क्ली, (दार्व्व्याः दारुहरिद्रायाः काथादुद्भवो यस्य ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥ कृत्रिमरसाञ्जनम् । इति रत्नमाला ॥

दार्षदः, त्रि, (दृषदि पिष्टः । दृषद्+"शेषे ।" ४ । २ । ९२ । इत्यण् ।) दृषद्भवः । इति सिद्धान्तकौमुदी ॥

दालं, क्ली, (दलेभ्यः सञ्चितम् । दल+अण् । यदुक्तम्,—
"संलुत्य पतितं पुष्पात् यत्तु पत्त्रोपरि स्थितम् । मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥")
वनमधु । इति शब्दार्थकल्पतरुः ॥ इन्द्रनीलदलाकारवृक्षप्रमक्षिकोत्पन्नं वृक्षकोटरान्तरभवं मधु । अस्य गुणाः । कटुत्वम् । कषायत्वम् । अम्लत्वम् । मधुरत्वम् । पित्तदोषकारित्वञ्च । इति राजनिर्घण्टः ॥

दालः, पुं, (दले जातम् । दल+अण् ।) कोद्रवः । इति हेमचन्द्रः ॥

दालवः, पुं, स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६६ ॥

दाला, स्त्री, (दल्यते स्थूलमतिभिरिति । दल+घञ्+टाप् ।) महाकालः । इति भावप्रकाशः ॥

दालिका, स्त्री, (दालेव । स्वार्थे कन् टाप् अत इत्वञ्च ।) महाकालः । इति भावप्रकाशः ॥

दालिमः, पुं, (दाडिमः । डस्य लः ।) दाडिमः । इत्यमरटीकायां भरतः ॥

दाली, स्त्री, (दाल्यते इति । दल+णिच्+इन् । कृदिकारादिति ङीष् ।) देवदाली लता । इति राजनिर्घण्टः ॥

दाल्भ्यः, पुं, (दलभस्य मुनेर्गोत्रापत्यम् । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) मुनिविशेषः । (यथा, महाभारते ।२।४।११।
"वको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः ॥")

दाल्मिः, पुं, (दालयति असुरानिति । दल+णिच्+बाहुलकात् मिः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

दावः, पुं, (दुनोति उपतापयतीति । दु+"दुन्योरनुपसर्गे ।" ३।१।१४२ । इति णः ।) वनम् । (यथा, महाभारते ।१।२२४।६।
"इदमिन्द्रः सदा दावं खाण्डवं परिरक्षति ॥")
वनवह्निः । इत्यमरः । ३ । ३ । २०५ ॥ (यथा, महाभारते । ३ । ६६ । १ ।
"उत्सृज्य दमयन्ती तु नलो राजा विशाम्पते ! । ददर्श दावं दह्यन्तं महान्तं गहने वने ॥")
अग्निः । इत्यमरटीकायां नीलकण्ठः ॥ उपतापः । इति भरतकृतद्विरूपकोषः ॥

दावाग्निः, पुं, (दावोद्भवोऽग्निः । शाकपार्थिवादिवत्समासः ।) वनोद्भवाग्निः । तत्पर्य्यायः । दवाग्निः २ दावानलः ३ । इति शब्दरत्नावली ॥ दवः ४ दावः ५ । इत्यमरः । ३ । ३ । २०५ ॥ (यथा, महाभारते । १ । १५५ । १५ ।
"दावाग्निधूमसदृशं चक्रतुः पार्थिवं रजः ॥")

दावानलः, पुं, (दावोद्भवः अनलः । दाव एवानलो वा ।) दावाग्निः । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । २६ । ९९ ।
"यद्दावानलतप्तस्य सुधाहृदनिमज्जने ॥")

दाविकः, त्रि, (देविकायां भवः । अण् । "देविकाशिंशपेति ।" ७ । ३ । १ । इति आदाच आत् ।) देविकानदीसम्भवः । इत्यमरः । १ । १० । ३६ ॥

दाश, ऋ ङ क दाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) द्वितीयस्वरी । ऋ, अददाशत् । क ङ, दाशयते । इति दुर्गादासः ॥

दाश, ऋ ञ दाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अददाशत् । ञ, दाशति दाशते । इति दुर्गादासः ॥

दाश, न र हिंसने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) द्वितीयस्वरी । न, दाश्नोति । र वैदिकः । इति दुर्गादासः ॥

दाशः, पुं, (दाश्यते दीयते भृतिरस्मै । दाश दाने+सम्प्रदाने घञ् ।) भृत्यः । इत्यमरटीकायां रमानाथः ॥ (दशति छिनत्ति मत्स्यानिति । दन्श+"दंशेश्च ।" उणां ५ । ११ । इति टः नस्य आत्वञ्च ।) धीवरः । यथा, देवीभागवते । २ । १ । ३९ ।
"मत्स्यगन्धेति नाम्ना वै गुणेन समजायत । विवर्द्धमाना दाशस्य गृहे सा वासवी शुभा ॥")

दाशपुरं, क्ली, (दाशान् कैवर्त्तान् पिपर्त्ति पालयतीति । पॄ+कः । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् ।) दशपुरम् । इत्यमरटीकायां स्वामी ॥

दाशरथः, पुं, (दशरथस्य अयम् । तस्येदमिति पितापुत्त्रत्वरूपसम्बन्धार्थे अण् ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा, महानाटके ।
"प्रदीयतां दाशरथाय मैथिली ॥"
दशरथसम्बन्धिनि, त्रि । यथा, भट्टिः । २ । ५३ ।
"अजीगणद्दाशरथं न वाक्यम् ॥")

दाशरथिः, पुं, (दशरथस्य अपत्यं पुमान् । "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) श्रीरामः